[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

॥ ईं ॐ श्रीः ॥

॥ ॐ भद्रं नो अपि वातय मनः ॥

॥ "ध्यान योगविद्या" ॥

॥ प्रथमा कला ॥

॥ आद्यं मङ्गलं पद्यम् ॥

॥ शार्दूल विक्रीडितम् ॥

"श्रीमद्" भारतमातृभूमिविजय-स्वानन्द सन्दोहिनी
श्रद्धा भारत मातृभूतिनिचय-ध्येयानुसन्धायिनी ।
नादब्रह्मपराऽक्षराऽभयकरा ब्रह्मात्मवित्केतना
नाम्ना ब्रह्मरसात्मशान्तिनिकराब्राह्मी परा चेतना ॥

॥ भारतं मातृभूमिः ॥ (१)

॥ स्रग्धरा वृत्तम् ॥

(१) "सद्विद्या वेद धर्मैः सममतिकृतिभिर्ध्यानयोगैस्तपोभिः
सत्याद्यैः शान्तिसत्त्वैः सममनुकृतिभिर्ज्ञानयज्ञैर्महेभिः ।
सान्नैः सञ्जीवनीयैः फलरसकुसुमैरौषधैः प्राणसत्त्वैः
सर्वैश्वर्यैः समृद्धं जगति परमिदं "भारतं मातृभूमिः" ॥ १ ॥

॥ भारतं योगभूमिः ॥ (२)

(२) प्रत्यक्षैकाधिभूत प्रकृतिहितकला सत्क्रिया सत्त्वयोगात्
पारोक्षैशाधिदैव प्रणिहितपरधी भावनाहृत्प्रयोगात् ।
आध्यात्मैकापरोक्ष प्रचुरतर तपोध्यान संवित्सुयोगात्
तत्त्वैक्यादि प्रधानं जगति परतमं "भारतं योगभूमिः" ॥ २ ॥

॥ भारतं देवभूमिः ॥ (३)

(३) भासा ब्रह्मात्मचित्त्या बृहति दिवि रतं भारतीदिव्यशक्त्या
भासि ब्रह्मात्मवित्त्या स्थितमनवरतं भूमदिव्यात्मभूत्या ॥
दैवीशक्त्या प्रपन्नं विलसदविरतं देवताधारसक्त्या
दैवीसम्पत्प्रसन्नं जयति मुनिरतं "भारतं देवभूमिः ॥३॥

॥ भारतं यज्ञभूमिः ॥ (४)

(४) छन्दःसत्वैः सुमन्त्रैर्ऋषिषु समुदितैः सस्वरैः सद्रसाप्तैः
छन्दार्थाप्तैः सुयन्त्रैर्ऋषिमुखमुदितैर्देवताभावनाप्तैः ॥
सद्भावेष्टैः सुतन्त्रैः कृतिमुखविहितैर्दिव्यसत्त्वैर्विशिष्टं
साक्षात् सत्प्रक्रियेष्टं जगति परमिदं "भारतं यज्ञभूमिः ॥४॥

॥ भारतं धर्मभूमिः ॥ (५)

(५) विश्वस्यापि प्रसादात् समहृदि जगतो धर्म एव प्रतिष्ठा
विश्वेषां सौमनस्यात् सपदि तनुभृतां प्राणसञ्जीवनेच्छया ॥
ज्ञानैर्भावेन कृत्या समरसमनसा यज्ञयोगप्रयुक्त्या
जीवानां धारणेष्टं जगति परतमं "भारतं धर्मभूमिः ॥५॥

॥ भारतं आर्षेयवैदिकसंस्कृतिभूमिः ॥ (६) ॥

(६) ब्राह्मीतन्वा प्रकृत्या प्रतिकृतिवृतया ब्रह्मकर्मप्रवृत्त्या
बीजक्षेत्रानुवृत्त्या प्रगतिपरतया ब्रह्मविद्या प्रभृत्या ॥
दिव्याध्यात्मतत्त्वा त्रिवृतकृतियुता वैदिकार्षेयसत्त्वा
देवाद्या भारताद्या जगति परतमा "संस्कृतेः सत्त्वभूमिः ॥६॥

॥ भारतं शान्तिभूमिः ॥ (७)

(७) आध्यात्मान्तर्ययोगात् प्रणिहितपरधी ज्ञानविज्ञानपूर्णं
स्वाध्यायैकाधिविद्याभ्युदितपरसुधी वेदविद्याभ्युदीर्णम् ॥
सत्येष्ट्या सत्त्ववृत्त्या सुविहिततपसा सामरस्यानुभूतेः
स्वात्मानन्दैकसन्धात् स्वयमुदितमिदं "भारतं शान्तिभूमिः॥ ७॥

॥ भारतं सत्यभूमिः ॥ (८)

(८) सत्यं ब्रह्माक्षरात्मामृतरसनिरतं सर्वविज्ञानसत्वं
संवित्सत्त्वात्मसत्ताकृतमतिनियतं संस्कृतिप्राणसत्त्वम् ॥
ब्राह्मीसञ्चेतनात्मा समरसकलिता स्वानुभावाधिभूमा
भासा चिद्भारतात्मा जगति विजयते "भारतं सत्यभूमिः॥ ८॥

॥ भारतं तपोभूमिः ॥ (९)

(९) ब्रह्मात्मज्ञानभूत्या सकलसुखकृते विश्वविद्याविभूत्यै
ब्रह्मानन्दानुभूत्या समहृदयकृते विश्वतोऽसद्विमुक्त्यै ॥
मन्वादीनामृषीणां सुनियततपसा पारमार्थ्ये प्रपञ्चे
सर्वार्थे भारतं वै प्रभवति महसा तत्तपोभूमिरिष्टा ॥ ९॥

॥ भारतं भक्तिभूमिः ॥ (१०)

(१०) वाचा प्राणेन चान्तः प्रणिहितमनसा सत्क्रियासत्त्ववृत्त्या
नाम्ना मन्त्रेण साम्ना प्रतिनिहितदृशा ज्ञानभावानुकृत्या ॥
भद्रा श्रीभारतीष्टा भगवति भवती श्रद्धया प्रेमनिष्ठा
भक्त्यै भुक्त्यै विमुक्त्यै प्रभवति सुहितं "भारतं भक्तिभूमिः ॥ १०॥

॥ भारतं राष्ट्रभूमिः ॥ (११)

(११) दौष्यन्तिः स्वप्रभावादिह भुवि भरतः क्षात्रतेजोऽभ्युदीर्णः
दैवीशक्तेः प्रसादात् स्वयमनुभवतः सन् विजेता वितीर्णः ॥

दैव्यं सेव्यं स्वराज्यं जनसुखनिरतं स्थापयामास पूर्वं
दैवीतन्त्रं स्वतन्त्रं जनसुखविरतं "भारतं राष्ट्रभूमिः ॥३१॥

॥ भारतं वेदभूमिः ॥ (३२)

(३२) वेदो विश्वाधिदेवः सकलहिततमो विश्वविज्ञानपूर्णः
वेद्यो विश्वाधिविद्यः सकलरसतमो विश्ववेत्ताऽभ्युदीर्णः ॥
वेदात्मा ब्रह्ममात्रा भगवदभिहिता भारती भारतेष्टा
वेदित्रा वेदमात्रा जयति भगवता "भारतं वेदभूमिः ॥३२॥

॥ भारती ज्ञानभूमिः ॥ (३३)

(३३) प्रज्ञानात्मैकसिद्धा समरसलसिता विश्वरूपाऽभ्युदीर्णा
प्रत्यक्चित्या समृद्धा सदसदतितता वाक् सुविज्ञानपूर्णा ॥
प्रज्ञा प्राणप्रतिष्ठा तपसि सुनिरता भासि भासाऽऽत्मभूतिः
प्रज्ञेयात्माभिवृद्धाऽप्युपनिषदुदिता "भारती ज्ञानभूमिः ॥३३॥

॥ भारती ब्रह्मभूमिः ॥ (३४)

(३४) प्रत्यग्वृत्त्या वरेण्या स्वरसरसचिता ब्रह्मणा संविदाना
प्रत्यग्वाचाऽग्रगण्या समरसनिचिता ब्रह्म सत्यं मिमाना ॥
ब्रह्मात्माऽऽनन्दभूमा परमरसमिता ब्रह्मसत्त्वाऽऽत्ममूर्तिः
ब्राह्मी सद्वाचकात्मा परचिति निचिता "भारती ब्रह्मभूमिः ॥३४॥

॥ भारती विश्वभूमिः ॥ (३५)

(३५) विश्वेषां नामरूप- प्रकृतिकवपुषां साक्षरा शब्दशक्तिः
वस्तूनां वाचकात्मा प्रणततनुजुषां सस्वरा नादमूर्तिः ॥
ब्रह्माणी ज्ञानभूमा परमरसकला बिन्दुसत्त्वा विभूतिः
ब्रह्मण्या व्योमधाम्ना प्रभवति भवती "भारती विश्वभूमिः ॥३५॥

(३६) ॥ भारतं सुरभारती भूमिः ॥ (३६)

विद्या भाषात्मभूत्या सुरसरिदिव सा दिव्यशक्त्याऽवतीर्णा
वेदा भावानुभूत्या स्वररसमहसा ब्रह्मसत्त्वाभ्युदीर्णा ॥
सज्ज्ञाने जीवनाढ्या रसनिररणकृद् भारतीयं सुपूर्णा
सञ्जीत्याद् भारतं वै जगति विजयकृद् "भारतीयात्मभूमिः" ॥ ३६ ॥

॥ इति सज्ज्ञानादिषोडशकलापरिपूर्णम् ॥

॥ भारती-भारतम् ॥

॥ चिरं विजयतेतराम् ॥

॥ वेदसत्त्वषोडशात्मचित्कलाप्रपूरितम्
वेदवाक्सुसंविदात्मचान्द्रिकाप्रतीरितम् ॥
दैवतेन्द्रभासि सद्व्रतं सदाऽस्ति भारतम्
दैवरातवाङ्मुखादुदीर्णमस्तु भारतम् ॥

॥ इति श्रीभारतमातृभूमिस्तवनम् ॥

॥ सम्पूर्णम् ॥

"भारतेऽस्मिन् उदीर्णः॥

॥श्री शङ्कराचार्यवर्यः॥

॥जगद्गुरुः॥

(स्रग्धरावृत्तम्)

(३७) "श्रीपूर्णे भारतेऽस्मिन् बृहदुपनिषदां ब्रह्मतत्त्वाधिवेत्ता
श्रीविद्यावेदधर्मप्रभृतिकृतिविदां ज्ञानयोगप्रशास्ता॥
सिद्धः सर्वज्ञकल्पो भुवि जयति भवान् ब्रह्मविद्यानुचर्यः
सुज्ञानान्मार्गदर्शी प्रभवति भगवान्-"शङ्कराचार्यवर्यः॥३७॥

॥ब्रह्मविद्याविशिष्टः ब्रह्मसत्त्वावशिष्टः॥

॥ब्रह्मनिष्ठः श्री शङ्कराचार्यः॥

(३८) सम्पूर्णे भारतेऽस्मिन्नपि जगति भवान् कीर्तिशेषः परस्मिन्
शास्त्रै र्ज्ञानादियोगैः श्रुतिमुखवचनैः शिक्षयन् ब्रह्मविद्याम्॥
आसेतोः सीतलाद्रेः समहृदि निचरन् ज्ञानविज्ञानपूर्णः
संसिद्धः शङ्करोऽसौ भुवि जयति महान् स्वात्मशान्तिप्रपूर्णः॥३८॥

॥औपनिषदं तत्त्वत्रयपूर्णं विज्ञानयोगम्-॥

॥श्रीशङ्कराचार्यः प्रशास्ति॥

(३९) ज्ञानं तत्त्वत्रयाप्तं जगति समुदितं वेदविज्ञानपूर्णं
साक्षादेवापरोक्षादवगतिमुदितं सत्यमेकं परोक्षम्॥
स्वाहञ्चित्सम्प्रपन्नो हिमगिरिशिखरे शङ्करः स्वात्मनिष्ठः
सद्ब्रह्मात्मप्रसन्नो निजमतिविदितं शास्ति सर्वज्ञपीठे॥३९॥

॥ तादृशं पूर्णं विज्ञानं अध्यात्मयोगेनैव सम्पद्यते ॥

(२०) विज्ञानं तत् सुपूर्णं हृदि रतमनसाऽध्यात्मयोगात् सुगम्यं
विज्ञानेनान्तरात्मन्युपनयनवता ध्यानयोगावगम्यम् ॥
विज्ञेयोऽन्तश्चिदात्माऽऽत्मनि समनिरतं सन्मनः सन्दधानः
विज्ञाताऽऽत्मा सुतृप्त्यै द्वयमधिगतः सन् समाधिप्रधानः ॥ २० ॥

॥ धारणा-ध्यानयोगेनैव समाधिसिद्धिः ॥

(२१) ध्यानात् सिध्येत् समाधिः प्रियतममननाद् धारणाचित्समीर्णः
ध्येयात्मन्येव गूढः स्वरामयमुदियाद् ध्यातृधीयोगपूर्णः ॥
ध्याताऽन्तश्चेतनात्मा परमरसतमः सर्वविज्ञानपूर्णः
ध्यातुर्ध्याने स्वरूपे स्वपदि विरमते ब्रह्मसंविद्रसार्णः ॥ २१ ॥

॥ ध्यातृ-ध्येय-ध्यानसत्त्वं त्रिपुटीतत्त्वम् ॥

(२२) ध्याता ध्येयं मिथः स्यात् सममितमुभयोर्ध्यानमान्तर्यमिष्टं
मध्यं तत्सन्धिरूपं प्रतिलसति तयोः सत्त्वयोगाद् विशिष्टम् ॥
सन्ध्योपास्तिप्रकृष्टं त्रिषवणनियतं ब्रह्मकर्मैव शिष्टं
नित्यादेतानि तानि व्यसनमिव सदा संविदैवाभ्युपास्यम् ॥ २२ ॥

॥ ज्ञातृ-ज्ञेय-ज्ञानरूपं त्रिपुटीसत्त्वम् ॥

(२३) ज्ञाता ज्ञेयं समस्तं समरसमुदितं वस्तुतादात्म्यसत्त्वं
ज्ञानं मध्यं समाप्तं मतमुभयमितं वस्तुभावैकतत्त्वम् ॥
ब्रह्मात्मज्ञानसत्त्वं समहितमनसाऽध्यात्मयोगावसाम्यं
जिज्ञासाहार्दसत्त्वात् सुविहिततपसा ज्ञायतां वस्तुसाम्यम् ॥ २३ ॥